# Shri Sarasvati Stotram

# શ્રીસરસ્વતીસ્તોત્રમ્

## Document Information

Text title : Sarasvati Stotram

File name : sarasvatIstotramumeshvarAnanda2.itx

Category : devii, sarasvatI, stotra, panchaka

Location : doc_devii

Proofread by : Paresh Panditrao

Description/comments : Ganga Mahatmya And Stuti Ratnavali By Swami Umeshvaranand Tirth

Latest update : July 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

# શ્રીસરસ્વતીસ્તોત્રમ્

નવાર્ક બિમ્બદ્યુતિ મુદ્ગલત્ હલત્
 તાટઙ્ક કેયૂર કિરીટ કઙ્કણમ્ ।
સ્ફુરત્ક્વણન્નૂપુરાવ રઞ્જિતાં
 નમામિ કોટિન્દુમુખીં સરસ્વતીમ્ ॥ ૧॥

વન્દે સદાઽહં કલહંસ ઉદ્ધતે
 ચલત્પદે ચઞ્ચલ ચઞ્ચુસમ્પુટે ।
નિર્ધૌત મુક્તાફલ હાર સઞ્ચયં
 સઙ્ધારયન્તીં સુભગાં સરસ્વતીમ્ ॥ ૨॥

વરાભયં પુસ્તક વલ્લકીયુતાં
 પરં દધાનં વિમલે કરદ્વયે ।
નમામ્યહં ત્વં શુભદાં સરસ્વતીં
 જગન્મયીં બ્રહ્મમયીં મનોહરામ્ ॥ ૩॥

તરઙ્ગિતાક્ષૌમસિતામ્બરે પરે
 દેહિ સ્વરજ્ઞાનમતીવ મઙ્ગલે ।
યેનાદ્વિતીયોહિ ભવેયમક્ષરે
 સર્વોપરિસ્યાં પર રાજમણ્ડલે ॥ ૪॥

શુક્લાં બ્રહ્મવિચાર સાર પરમામાદ્યાં જગદ્ વ્યાપિની
 વીણા પુસ્તક ધારિણીમભયદાં જાડ્યાન્ધકારાપહામ્ ।
હસ્તેસ્ફાટિકમાલિકાં વિદધતીં પદ્માસને સંસ્થિતાં
 વન્દેતાં પરમેશ્વરીં ભગવતીં બુદ્ધિપ્રદાં શારદામ્ ॥ ૫॥

ઇતિ શ્રી સ્વામી ઉમેશ્વરાનન્દતીર્થવિરચિતં સરસ્વતીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Paresh Panditrao

*Shri Sarasvati Stotram*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*